# Rameshvara Mahima Varnanam

# રામેશ્વરમહિમવર્ણનમ્

## Document Information

Text title : Rameshvara Mahima Varnanam

File name : rAmeshvaramahimavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 28||

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 1, 2024

*sanskritdocuments.org*

# રામેશ્વરમહિમવર્ણનમ્

રામઃ -
ભગવન્ શામ્ભવશ્રેષ્ઠ મામત્યન્તં સુદુઃખિતમ્ ।
સમુદ્ધરાવ માં દીનં ભાર્યાહરણકર્શિતમ્ ॥ ૪૬॥

મુનીન્દ્રોઽપિ તદા રામં દીક્ષયિત્વા વિધાનતઃ ।
ભસ્મનોદ્ધૂલ્ય તસ્યાઙ્ગં દત્વા પઞ્ચાક્ષરં મનુમ્ ॥ ૪૭॥

ગન્ધમાદનસંસ્થં માં દર્શયામાસ ભક્તિતઃ ।
તલ્લિઙ્ગં પૂજયામાસ રામેણ સ તદા મુનિઃ ॥ ૪૮॥

બિલ્વપત્રૈર્વન્યપુષ્પૈઃ ફલૈર્નૈવેદ્યમાતનોત્ ।
તદા તુષ્ટાવ રામો માં સ્વકષ્ટવિનિવૃત્તયે ॥ ૪૯॥

—

રામઃ -
શ્રીકાલકાલાનલભાલમૂલ દેવ ત્વમાદ્યો જગતઃ પ્રતિષ્ઠા ।
શૂલામલોદ્યત્કર બાલપાલ હાલાહલાલઙ્કૃતનીલકણ્ઠ ॥ ૫૦॥

ત્વં ભક્તિગમ્યોઽમરપાલ શમ્ભો માલાકૃતાહીન્દ્ર વિશાલબાહો ।
લીલાકૃતં તે જગદેકજાલં મે દુઃખમૂલં સહસા હરસ્વ ॥ ૫૧॥

—

ઈશ્વરઃ -
ઇતિ સ્તુત્વા તદા રામો ગન્ધમાદનમીશ્વરમ્ ।
તસ્મૈ ચ દર્શનં દત્તં જેતા ત્વં રાવણં મૃધે ॥ ૫૨॥

ગચ્છેતિ ચ તદા ચોક્તો માં પ્રણમ્યાબિકે તદા ।
અગસ્ત્યેન તદા દત્તં ખડ્ગં ચાપિ મહાપ્રભમ્ ॥ ૫૩॥

તૂણીરં ચ શરૈઃ પૂર્ણં યયૌ ભ્રાત્રા સમન્વિતઃ ।
સેતું મત્કૃપયા બદ્ધ્વા યુદ્ધે રાવણમદ્ભુતમ્ ॥ ૫૪॥

સાનુજં સસુતં હત્વા સીતાં પ્રપય મહાબલઃ ।
પૌલસ્ત્યવધસઞ્જાતબ્રહ્મહત્યાપનુત્તયે ॥ ૫૫॥

ધનુષ્કોટિમહાતીર્થે માસં સ્નાત્વા સ ભક્તિતઃ ।
ભ્રાત્રા ચ ભાર્યયા સાર્ધં વલીમુખસમન્વિતઃ ॥ ૫૬॥

સ નાર્મદં સમાનીય લિઙ્ગં તત્પવનાત્મજાત્ ।
સ્થાપયામાસ હૃષ્ટાત્મા મુનિના રાવણાન્તકઃ ॥ ૫૭॥

ગન્ધમાદનપૃષ્ઠે વૈ ગન્ધમાદનશઙ્કરાત્ ।
પશ્ચિમે પરમેશાનિ સમ્પૂજ્યામરનાયકમ્ ॥ ૫૮॥

રામેશ્વરં તદા દેવિ સ્વનામ્ના લિઙ્ગમુત્તમમ્ ।
સમર્ચયિત્વા બિલ્વાદ્યૈઃ પૂજયા માં તદામ્બિકે ॥ ૫૯॥

સ ભ્રાત્રા ચ તદા પત્ન્યા સુગ્રીવાદ્યૈશ્ચ વાનરૈઃ ।
લિઙ્ગાનિ સ્થાપયામાસ ગન્ધમાદનમસ્તકે ॥ ૬૦॥

તીર્થાનિ કલ્પયિત્વાથ દેવં રામેશ્વરં તદા ।
શુદ્ધગઙ્ગાજલૈઃ સ્નાપ્ય પૂજ્ય બિલ્વૈશ્ચ પઙ્કજૈઃ ॥ ૬૧॥

પ્રણમ્ય રામઃ સાષ્ટાઙ્ગં તુષ્ટાવાથ કૃતાઞ્જલિઃ ।

—

રામઃ -

રામેશ્વરેશ્વર મહેશ પિનાકપાણે ગમ્ભીરસાગરનિષઙ્ગ ભુજઙ્ગહાર ।
દ્રાપિન્હિરણ્મયશરીર સુચન્દ્રમૌલે ગઙ્ગોત્તમાઙ્ગ ભવ ભૂતપતે નમસ્તે ॥ ૬૨॥

વિશ્વોદયસ્થિતિલયાન્તકર પ્રસીદ મામાશુ પાહિ દદયા પ્રમથાધિનાથ ।
દુર્વારદુઃખતરસંસૃતિબન્ધનાશં શશ્વત્ કુરુષ્વ ભગવન્ કરુણાકટાક્ષૈઃ ॥ ૬૩॥

પાહિ પ્રસીદ પરમેશ્વર પઞ્ચવક્ત્ર ભર્ગ ત્રિયમ્બક સુરાસુરપૂજ્યપાદ ।
પૌલસ્ત્યસંહૃતિભવાઘભરં હરસ્વ મદ્દુઃખજાલમપરાધગણં ક્ષમસ્વ ॥ ૬૪॥

—

ઈશ્વરઃ -

ઇતિ સ્તુતોઽહં રામેણ તદા દેવિ સસીતયા (?) ।
તં પ્રસન્નસ્તદા વાક્યમબ્રવં પ્રણતં શિવે ॥ ૬૫॥

મા ભૈષીઃ સર્વભદ્રં તે કૃતં લોકહિતં ત્વયા ।
બદ્ધઃ સેતુઃ સમુદ્રે મે રાવણઃ સાનુજો હતઃ ॥ ૬૬॥

મત્પ્રસાદાદભૂદ્રામ ગુરુસ્તે કુમ્ભસમ્ભવઃ ।
એતસ્ય કૃપયા રામ મત્પ્રસાદસ્તવાભવત્ ॥ ૬૭॥

રામ શામ્ભવસઙ્ગેન ન કિઞ્ચિદપિ દુર્લભમ્ ।
શામ્ભવાઙ્ગૈકસઙ્ગૈન પાપભઙ્ગોઽભવત્ તવ ॥ ૬૮॥

રામેશ્વરમિદં લિઙ્ગં ત્વયા સંસ્થાપિતં મમ ।
એતસ્ય દર્શનાત્ સદ્યઃ પાપનાશો ભવિષ્યતિ ॥ ૬૯॥

ધનુષ્કોટૌ નરઃ સ્નાત્વા રામેશં યસ્તુ પશ્યતિ ।
સ હિ મુક્તો ભવત્યેવ તસ્યૈવ કુલમુન્નતમ્ ॥ ૭૦॥

તસ્યૈવ પિતરસ્તૃપ્તાસ્તેનોર્વી સફલામ્બિકે ।
શામ્ભવેભ્યો મુદા દત્વા સ્નાપયેદ્યો મહેશ્વરમ્ ॥ ૭૧॥

ગઙ્ગાભસા મહાદેવિ બિલ્વૈરભ્યર્ચ્ય યો હિ મામ્ ।
શ્રીમદ્રામેશ્વરં લિઙ્ગં મદ્જ્ઞાનં પ્રાપ્ય મુચ્યતે ॥ ૭૨॥

ગચ્છ ત્વં કોસલાનાશુ મત્પ્રસાદાત્ સુખી ભવ ।
ઇત્યુક્ત્વા તં તદા ગૌરિ તસ્મિન્લિઙ્ગે તિરોહિતઃ ॥ ૭૩॥

અગસ્ત્યં માં પ્રણમ્યૈવ યયૌ રામસ્તદાદ્રિજે ।
ગત્વાઽશ્વમેધં મત્તૃપ્ત્યૈ સમુપાહરદમ્બિકે ॥ ૭૪॥

તત્ર રાજ્યં ચિરં કૃત્વા સોઽપિ કાલે દિવં ગતઃ ।
વિષ્ણુર્મામમ્બિકે નિત્યં સેતુમાધવસઞ્જ્ઞકઃ ॥ ૭૫॥

ગઙ્ગામ્ભસાભિષિચ્યેશં બિલ્વૈઃ સમ્પૂજ્ય ભક્તિતઃ ।
રામેશ્વરં તદા ગૌરિ તત્રાસ્તે મત્પ્રસાદતઃ ॥ ૭૬॥

—

સૂતઃ -
ય એતચ્છૃણુયાન્નિત્યં શ્રીરામેશ્વરવૈભવમ્ ।
તસ્ય પાપાનિ નશ્યન્તિ તૂલમગ્નિમુખે યથા ॥ ૭૭॥

શ્રીરામેશ્વરલિઙ્ગમેતદમલં સ્વર્ગાપવર્ગપ્રદં
    બિલ્વાદ્યૈરમરૈસ્તથા મુનિગણૈઃ સંસેવિતં પૂજિતમ્ ।

દૃષ્ટ્વા પાપજરાદિરોગરહિતો મુક્તો ભવત્યમ્બિકે
ધન્યો મત્પદપૂજકઃ સુકૃતિનાં માન્યો વરિષ્ઠઃ સ હિ ॥ ૭૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવગૌરીસંવાદે રામેશ્વરમહિમવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૨૮॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 28..

Notes:
Having been cursed by Rishi Bhrigu, Shri Narayana is born in Prithviloka as Shri Rama and loses His wife to abduction by Ravana. During the attempt to reach Lanka for rescuing Sita, the distressed Rama worships Shiva at Mount Gandhamadana, as advised by Rishi Agastya (Kumbhasambhava). Thereafter, Rama builds the Setu to cross over to Lanka along with His army, and defeats Ravana to rescue Sita. Upon His victorious return, He bathes at Dhanushkoti and worships the Linga brought from Narmada river, which thereafter came to be known as Rameshwara Jyotirlinga. Vishnu resides there as Setu Madhava and worships the Rameshwara Jyotirlinga with water from River Ganga.

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

*Rameshvara Mahima Varnanam*
pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*